दिनाङ्क :-10.02.2025

प्रात: - 06:55

<u>प्रधानमन्त्री-परीक्षा-पे चर्चा</u>

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना आरब्धस्य संवादात्मक-कार्यक्रमस्य परीक्षा-पे-चर्चा इत्यस्य अष्टमं संस्करणं अद्य प्रातःकाले एकादशवादने दूरदर्शनम् समेत्य अनेकेषु अन्तर्जालपटलेषु प्रसारयिष्यते। प्रधानमन्त्री छात्रैः अभिभावकैः शिक्षकैः च सह संवादं कृत्वा परीक्षायाः सज्जतायाः चिन्ताप्रबन्धनस्य व्यक्तिगतविकासस्य च विषये अन्तर्दृष्टिं प्रदास्यति। कार्यक्रमस्य अस्य सजवप्रसारणम् आकाशवाणी-दूरदर्शन-स्वयं-स्वयंप्रभा-प्रधानमन्त्रिकार्यालयानां यूट्यूबवाहिनीषु अथ च शिक्षा-सूचनाप्रसारण-मन्त्रालयानाम् सामाजिक-सञ्चारतन्त्रेषु करिष्यते। सर्वेभ्यः प्रदेशेभ्यः चिताः षड्त्रिंशत् छात्राः प्रधानमन्त्रिणा सह साक्षात्संवादमपि करिष्यन्ति। अस्मिन् कार्यक्रमे सप्तानि ज्ञानवर्धनसत्राणि भविष्यन्ति।

<u>पेरिस- ए- आई-एक्शन-समिट - 2025</u>

अद्यारभ्य पेरिसमध्ये द्विदिवसीयस्य ए-आई-एक्शन-समिट इत्यस्य शिखरसम्मेलनस्य आरम्भो भविष्यति, यत्र च कृत्रिमता-बुद्धिमत्ता-तन्त्र-विकास-विषये वैश्विकनेतारः उद्योगपतयः शोधकर्तारश्च समवेताः भविष्यन्ति, प्रधानमन्त्री नरेन्द्रमोदी फ्रांसदेशस्य च राष्ट्रपतिना इमैनुएल-मैक्रों इत्यनेन सह शिखरसम्मेलनस्य सहाध्यक्षतां विधातुम् अद्य पेरिसनगरं प्रति प्रस्थास्यति। एतस्य कार्यक्रमस्य उद्देश्यं वैश्विक-एआई-नीतीनां साकारीकरणं नवाचारस्य च नैतिकदायित्वेन सह सर्जनं विद्यते।

## महाकुम्भः-राष्ट्रपतियात्रा

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्य प्रयागराजे महाकुम्भं प्रति याति। तत्रासौ गङ्गा-यमुना-सरस्वती-नदीनां सङ्गमे पवित्रस्नानं समाचरिष्यति पूजार्चनामपि विधास्यति। तदनु राष्ट्रपतिः प्रयागराजे एव विद्यमानस्य बड़ेहनुमान इत्याख्यस्य मन्दिरस्य अथ च अक्षयवटं प्रति दर्शनाय गमिष्यति। एतदनन्तरम् असौ डिजिटल-महाकुम्भ-एक्सपीरियसं-सेन्टर इत्यत्र आधुनिक-तन्त्रज्ञानप्रणाल्याः माध्यमेन महाकुम्भस्य गहनज्ञानम् अवलोकयिष्यति।

## छत्तीसगढ-सङ्घर्षः

छत्तीसगढे सुरक्षाबलैस्सह सञ्जाते सङ्घर्षे एकत्रिंशत् माओवादिनः सैन्यबलैः मारिताः। भुशुण्डी-गोलिकादि-प्रहारेषु द्वौ सुरक्षाकर्मिणौ वीरगतिं प्राप्तौ, अन्यौ द्वौ च व्रणितावपि सञ्जातौ इति सूचना वर्तते। गृहमन्त्रिणा अमितशाहेन वीरसैन्य-पारिवारिकजनान् प्रति संवेदनाः प्रकटिताः। तेन भणितं यत् सुरक्षाबलैः बीजापुर-छत्तीसगढे च स्वलक्ष्यं प्राप्तम्। माओवादीनां मृत्यौः स्थलात् बृहन्मात्रिक-आयुध-सामग्री अपि अधिगतास्ति।

## चक्रवातः-2025 इति

भारत-मिस्र-देशौ अद्यारभ्य त्रयोविंशतिदिनाङ्कं यावत् राजस्थानस्य महाजन-फिल्ड-फायरिंग-रेंज-इत्याख्ये स्थले पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षीयस्य चक्रवात इत्यभिनामधेयकस्य संयुक्तसैन्याभ्यासं करिष्यतः। अस्य संयुक्ताभ्यासस्य उद्देश्यं भारत-मिस्र-देशयोर्मध्ये रक्षा-सहकार्यं वर्धयितुं व्यावसायिक-कौशलस्य आदानप्रदानं मरुभूमि-वातावरणे विशिष्टबलानां पारस्परिक-कार्यक्षतायाः वर्धनमिति वर्तते।

इदं हि चक्रवातस्य तृतीयं संस्करणं वर्तते। भारतीय-सैन्य-बलस्य समूहस्य प्रतिनिधित्वं पैराशूट-रेजिमेण्ट-इत्येतस्य विशिष्टबलस्य कर्मिभिः क्रियते। साम्प्रतिकेषु वर्षेषु भारत-मिस्र-देशयोः मध्ये सैन्यसहयोगः सुदृढो जातः।

क्रिकेट- द्वितीयः एकदिवसीयः

पुरुषक्रिकेट्-क्रीडायां ह्य: कटक-नगरस्य बाराबती-क्रीडाङ्गणे तिसृणां-क्रीडानां श्रृङ्खलाया: एकदिवसीय-द्वितीये अन्ताराष्ट्रिय-द्वन्द्वे भारतीयदलेन इङ्ग्लैण्ड्-दलं चतुर्भि: स्तोभै: पराजितम्। एतेन साकमेव श्रृंखला द्वे शून्यं इत्यङ्कान्तरालेन विजितम्। श्रृङ्खलाया: तृतीया अन्तिमा च प्रतिस्पर्धा अस्य मासस्य द्वादशः दिनाङ्के अहमदाबादनगरे क्रीडिष्यते।